॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ७२

तस्य तद्वचनं श्रुत्वा राघवः शोककर्शितः ।
नोपधारयते व्यक्तं यदुक्तं तेन रक्षसा ॥१॥

ततो धैर्यमवष्टभ्य रामः परपुरञ्जयः ।
विभीषणमुपासीनमुवाच कपिसंनिधौ ॥२॥

नैरृताधिपते वाक्यं यदुक्तं ते विभीषण ।
भूयस्तच्छ्रोतुमिच्छामि ब्रूहि यत्ते विवक्षितम् ॥३॥

राघवस्य वचः श्रुत्वा वाक्यं वाक्यविशारदः ।
यत्तत्पुनरिदं वाक्यं बभाषे स विभीषणः ॥४॥

यथाज्ञप्तं महाबाहो त्वया गुल्मनिवेशनम् ।
तत्तथानुष्ठितं वीर त्वद्वाक्यसमनन्तरम् ॥५॥

तान्यनीकानि सर्वाणि विभक्तानि समन्ततः ।
विन्यस्ता यूथपाश्चैव यथान्यायं विभागशः ॥६॥

भूयस्तु मम विज्ञाप्यं तच्छ्रुणुष्व महायशः ।
त्वय्यकारणसन्तप्ते सन्तप्तहृदया वयम् ॥७॥

त्यज राजन्निमं शोकं मिथ्या सन्तापमागतम् ।
तदियं त्यज्यतां चिन्ता शत्रुहर्षविवर्धनी ॥८॥

उद्यमः क्रियतां वीर हर्षः समुपसेव्यताम् ।
प्राप्तव्या यदि ते सीता हन्तव्यश्च निशाचराः ॥९॥

रघुनन्दन वक्ष्यामि श्रूयतां मे हितं वचः ।
साध्वयं यातु सौमित्रिर्बलेन महता वृतः ।
निकुम्भिलायां सम्प्राप्य हन्तुं रावणिमाहवे ॥१०॥

धनुर्मण्डलनिर्मुक्तैराशीविषविषोपमैः ।
शरैर्हन्तुं महेष्वासो रावणिं समितिञ्जयः ॥११॥

तेन वीरेण तपसा वरदानात्स्वयम्भुतः ।
अस्त्रं ब्रह्मशिरः प्राप्तं कामगाश्च तुरङ्गमाः ॥१२॥

निकुम्भिलामसम्प्राप्तमहुताग्निं च यो रिपुः ।
त्वामाततायिनं हन्यादिन्द्रशत्रो स ते वधः ।
इत्येवं विहितो राजन्वधस्तस्यैव धीमतः ॥१३॥

वधायेन्द्रजितो राम तं दिशस्व महाबलम् ।
हते तस्मिन्हतं विद्धि रावणं ससुहृज्जनम् ॥१४॥

विभीषणवचः श्रुत्व रामो वाक्यमथाब्रवीत् ।
जानामि तस्य रौद्रस्य मायां सत्यपराक्रम ॥१५॥

स हि ब्रह्मास्त्रवित्प्राज्ञो महामायो महाबलः ।
करोत्यसंज्ञान्सङ्ग्रामे देवान्सवरुणानपि ॥१६॥

तस्यान्तरिक्षे चरतो रथस्थस्य महायशः ।
न गतिर्ज्ञायते वीरसूर्यस्येवाभ्रसम्प्लवे ॥१७॥

राघवस्तु रिपोर्ज्ञात्वा मायावीर्यं दुरात्मनः ।
लक्ष्मणं कीर्तिसम्पन्नमिदं वचनमब्रवीत् ॥१८॥

यद्वानरेन्द्रस्य बलं तेन सर्वेण संवृतः ।
हनूमत्प्रमुखैश्चैव यूथपैः सहलक्ष्मण ॥१९॥

जाम्बवेनर्क्षपतिना सह सैन्येन संवृतः ।
जहि तं राक्षससुतं मायाबलविशारदम् ॥२०॥

अयं त्वां सचिवैः सार्धं महात्मा रजनीचरः ।
अभिज्ञस्तस्य देशस्य पृष्ठतोऽनुगमिष्यति ॥२१॥

राघवस्य वचः श्रुत्वा लक्ष्मणः सविभीषणः ।
जग्राह कार्मुकं श्रेष्ठमन्यङ्गीमपराक्रमः ॥२२॥

संनद्धः कवची खड्गी स शरी हेमचापधृक् ।
रामपादावुपस्पृश्य हृष्टः सौमित्रिरब्रवीत् ॥२३॥

अद्य मत्कार्मुकोन्मुक्ताः शरा निर्भिद्य रावणिम् ।
लङ्कामभिपतिष्यन्ति हंसाः पुष्करिणीम् इव ॥२४॥

अद्यैव तस्य रौद्रस्य शरीरं मामकाः शराः ।
विधमिष्यन्ति हत्वा तं महाचापगुणच्युताः ॥२५॥

स एवमुक्त्वा द्युतिमान्वचनं भ्रातुरग्रतः ।
स रावणिवधाकाङ्क्षी लक्ष्मणस्त्वरितो ययौ ॥ २६ ॥

सोऽभिवाद्य गुरोः पादौ कृत्वा चापि प्रदक्षिणम् ।
निकुम्भिलामभिययौ चैत्यं रावणिपालितम् ॥ २७ ॥

विभीषणेन सहितो राजपुत्रः प्रतापवान् ।
कृतस्वस्त्ययनो भ्रात्रा लक्ष्मणस्त्वरितो ययौ ॥ २८ ॥

वानराणां सहस्रैस्तु हनूमान्बहुभिर्वृतः ।
विभीषणः सहामात्यस्तदा लक्ष्मणमन्वगात् ॥ २९ ॥

महता हरिसैन्येन सवेगमभिसंवृतः ।
ऋक्षराजबलं चैव ददर्श पथि विष्ठितम् ॥ ३० ॥

स गत्वा दूरमध्वानं सौमित्रिर्मित्रनन्दनः ।
राक्षसेन्द्रबलं दूरादपश्यद्व्यूहमास्थितम् ॥ ३१ ॥

स सम्प्राप्य धनुष्पाणिर्मायायोगमरिन्दम ।
तस्थौ ब्रह्मविधानेन विजेतुं रघुनन्दनः ॥ ३२ ॥

विविधममलशस्त्रभास्वरं तद्
ध्वजगहनं विपुलं महारथैश् च ।
प्रतिभयतममप्रमेयवेगं
तिमिरमिव द्विषतां बलं विवेश ॥ ३३ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com